শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী প্রহ্লাদেন কৃতং

# ॥ শ্রী হর্যষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী হর্যষ্টকম্ ॥

হরির্হরতি পাপানি দুষ্টচিত্তৈরপি স্মৃতঃ।
অনিচ্ছযাঽপি সংস্পৃষ্টো দহত্যেৱ হি পাৱকঃ॥ 1 ॥

স গঙ্গা স গযা সেতুঃ স কাশী স চ পুষ্করম্।
জিহ্ৱাগ্রে ৱর্ততে যস্য হরিরিত্যক্ষর দ্ৱযম্॥ 2 ॥

ৱারাণস্যাং কুরুক্ষেত্রে নৈমিশারণ্য এৱ চ।
যৎকৃতং তেন যেনোক্তং হরিরিত্যক্ষর দ্ৱযম্॥ 3 ॥

পৃথিৱ্যাং যানি তীর্থানি পুণ্যান্যাযতনানি চ।
তানি সর্ৱাণ্যশেষাণি হরিরিত্যক্ষর দ্ৱযম্॥ 4 ॥

গৱাং কোটিসহস্রাণি হেমকন্যাসহস্রকম্।
দত্তং স্যাত্তেন যেনোক্তং হরিরিত্যক্ষর দ্ৱযম্॥ 5 ॥

ঋগ্ৱেদোঽথ যজুর্ৱেদঃ সামৱেদোঽপ্যথর্ৱণঃ।
অধীতস্তেন যেনোক্তং হরিরিত্যক্ষর দ্ৱযম্॥ 6 ॥

অশ্ৱমেধৈর্মহাযজ্ঞৈঃ নরমেধৈস্তথৈৱ চ।
ইষ্টং স্যাত্তেন যেনোক্তং হরিরিত্যক্ষর দ্ৱযম্॥ 7 ॥

প্রাণ প্রযাণ পাথেযং সংসার ৱ্যাধিনাশনম্।
দুঃখাত্যন্ত পরিত্রাণং হরিরিত্যক্ষর দ্ৱযম্॥ 8 ॥

বদ্ধঃ পরিকরস্তেন মোক্ষায গমনং প্রতি।
সকৃদুচ্চারিতং যেন হরিরিত্যক্ষর দ্ৱযম্॥ 9 ॥

হর্ষ্টকমিদং পুণ্যং প্রাতরুত্থায যঃ পঠেৎ।
আযুষ্যং বলমারোগ্যং যশো ব্বৃদ্ধিশ্শ্রিযাৱহম্॥ **10**॥

প্রহ্লাদেন কৃতং স্তোত্রং দুঃখসাগর শোষণম্।
যঃ পঠেৎস নরো যাতি তদ্বিষ্ণোঃ পরমং পদম্॥ **11**॥

॥ শ্রী হর্ষ্টকং সমাপ্তম্॥